संस्कृत-वार्ता:

दिनाङ्कः-16.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी आन्ध्रप्रदेशस्य कुर्नूल-नगरे त्रिंशदधिकचतुश्शतोत्तरत्रयोदशसहस्र-कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम् अकरोत्।
- केन्द्रीय-ग्रामविकास-मन्त्री शिवराजसिंह्-चौहानः प्रधानमन्त्री-ग्राम-सड़क-योजना इत्यस्य प्रगतिं समीक्षितवान्
- बिहारराज्ये विधानसभानिर्वाचनार्थं प्रचारकार्यस्य गतिः वर्धते; जे. डी. (यू.) इति दलेन चतुश्चत्वारिंशत् अभ्यर्थिनां द्वितीया सूचिः प्रकाशिता।
- बैडमिण्टनेति क्रीडायां लक्ष्यसेनः पुरुष-एकल-क्रीडायां, सात्विक्साईराज् रङ्किरेड्डी, चिराग् शेट्टी च पुरुष-डबल्स इति क्रीडायां अद्य डेन्मार्क्-ओपन्-क्रीडायाः प्रागुपान्त्यर्धचक्रे क्रीडन्ति।

--------------------------------------

प्रधानमन्त्री-आन्ध्राप्रदेशे

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य आन्ध्रप्रदेशस्य कुर्नूल-नगरे प्रायः सार्धचतुश्शतोत्तरत्रयोदशसहस्र- कोटिरूप्यकाणां बहुविधविकासयोजनानां उद्घाटनम्, शिलान्यासञ्च कृत्वा परियोजनाः राष्ट्रार्पिताः। एते प्रकल्पाः उद्योगक्षेत्रेषु, विद्युत्-प्रेषणक्षेत्रेषु, मार्गेषु, रेलमार्गेषु, रक्षा-निर्माणक्षेत्रेषु, पेट्रोलियम-प्राकृतिकग्यास् इत्येतेषु च क्षेत्रेषु विस्तृताः सन्ति, येन क्षेत्रीयसंरचनायाः वर्धनार्थं, औद्योगिकीकरणस्य गतिं वर्धयितुं, राज्ये सर्वसमावेशक-सामाजिक-आर्थिकवृद्ध्यै च सर्वकारस्य प्रतिबद्धतां प्रदर्शयति। अस्मिन् अवसरे जनसमूहं सम्बोधयन् प्रधानमन्त्री अवदत् यत् आन्ध्रप्रदेशः द्रुतगत्या विकासस्य मार्गे अग्रे गम्यमानोऽस्तीति। सप्तचत्वारिंशदधिकद्विसहस्रतमे वर्षे, यदा भारतं स्वातन्त्र्यस्य शतवर्षाणि

पूरयिष्यति, तदा यथार्थतया विकसित-भारतं भविष्यतीति आत्मविश्वासेन वक्तुं शक्नोमीति प्रधानमन्त्री अवदत्।

अस्मिन् अवसरे मुख्यमन्त्री चन्द्रबाबु नायडुः, उपमुख्यमन्त्री पवनकल्याणश्च उपस्थितौ आस्ताम्। प्रधानमन्त्री अद्य प्रातः आन्ध्रप्रदेशस्य एकदिवसीयायां यात्रायां कुर्नूल्-नगरं प्राप्तवान्। आगमनसमये प्रधानमन्त्री श्रीशैलम्-नगरस्य श्री-भ्रामरम्ब-मल्लिकार्जुन-स्वामी-वर्ला-देवस्थानम् इत्यत्र प्रार्थनां कृतवान्। इदं मन्दिरं द्वादश- ज्योतिर्लिङ्गेषु अन्यतममस्ति, द्विपञ्चाशच्छक्तिपीठेषु च अन्यतममपि।

---------------------------------------

## शिवराजसिंहचौहानः-ग्रामसड़कयोजना

केंद्रीय-ग्रामीण-विकास-मंत्री शिवराज-सिंह-चौहानः अद्य नवदिल्ल्याम् एकस्मिन् उपवेशने प्रधानमंत्री-ग्राम-सड़क-योजना इत्यस्य प्रगतिं समीक्षितवान्। मन्त्रालयः एकस्मिन् वक्तव्ये अकथयत् यत् उपवेशनावधौ , केंद्रीय-मंत्रिणे PMGSY इत्यस्या: योजनायाः राज्यानुसारं प्रगतिविषयिकी सूचना प्रदत्ता । श्रीचौहानेन प्रधानमन्त्रीग्रामसडकयोजना एत्येषा ऐतिहासिकी योजना प्रोक्ता यया ग्रामीणभारते महत्परिवर्तनं कृतमस्ति। केन्द्रीय-ग्रामविकास-मन्त्री शिवराजसिंह-चौहानः प्रधानमन्त्री-ग्राम-सड़क-योजना इत्यस्य प्रगतिं समीक्षितवान्।

---------------------------------------

## बिहारनिर्वाचनम्

बिहारराज्ये विधानसभानिर्वाचनार्थं प्रचारकार्यस्य गतिः वर्धते; जे. डी. (यू.) इति दलेन चतुश्चत्वारिंशत् अभ्यर्थिनां द्वितीया सूचिः प्रकाशिता ।

---------------------------------------

## शाह- एक्सट्रैडिशन-कॉन्फ्रेंस्

गृहमन्त्री अमितशाहः अद्य पुनरुच्चारितवान् यत् सर्वकारः भ्रष्टाचारापराध-आतङ्कवादान् विरुध्य जीरो-टॉलरेंस् इति नीत्याः अनुसरणं करोति । श्रीशाहः अद्य नवदिल्ल्यां द्विदिवसीयस्य एक्सट्रैडिशन-ऑफ-फ्यूजिटिव्स-चैलेंजेस्-एंड-स्ट्रैटेजीज-कॉन्फ्रेंस् इत्यस्य उद्घाटनानन्तरं सम्बोधयति स्म । गृहमन्त्री अकथयत् यत् एतत् सुनिश्चेतुम् एकः सुदृढः प्रकल्पः निर्मीयते यत् सर्वे अपि अपराधिनः विध्यन्तर्गतं आनेतव्याः । सः प्रोक्तवान् यत् , पलायितान् अपराधिनः विरुध्य सुदृढं कार्याचरणं विधेयं येन ते देशस्य विधिनियमान् सम्मुखीकुर्युः । विधिनियमानां सुदृढीकरणाय विधीयमानान् प्रयासान् प्रकाशयन् श्रीशाहः अकथयत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे सर्वकारः देशस्य सीम्निषु सुरक्षां, देशाभ्यन्तरे न्यायं च सुनिश्चेतुं प्रतिबद्धः अस्ति ।

---------------------------------------

## गुजरातः-भूपेन्द्रपटेलः

मुख्यमंत्रिणः भूपेंद्र-पटेलस्य मन्त्रिमण्डले नवनिर्वाचिताः मन्त्रिणः शपथवचनानि स्वीकरिष्यन्ति । शपथ-ग्रहण-समारोहः गांधीनगरस्य महात्म-मंदिरे राज्यपालस्य आचार्यः देवव्रतः इत्यस्य उपस्थितौ भविष्यति । राज्यपालः राज्य-मन्त्रिमण्डलस्य विस्तारे सम्मिलितेभ्यः मन्त्रिभ्यः पदस्य गोपनीयतायाः च शपथवचनानि दास्यति ।

---------------------------------------

## जयशङ्करः-श्रीलङ्का

विदेश-मंत्री डॉ. एस्-जयशंकरः अद्य नवदिल्ल्यां श्रीलंकायाः प्रधानमंत्रिणा डॉ. हरिनी-अमरसूर्या इत्यनया सह मेलनम् अकरोत् । एकस्मिन् समाजिक-संदेशे , डॉ. जयशंकरः अकथयत् यत् सः श्रीलंकायै भारतस्य समर्थनं , शिक्षा-निर्माण-क्षेत्रयोः परस्परसहयोगं च विधातुं चर्चाम् अकरोत् ।

---------------------------------------

जयशंकर-यूएनटीसीसी:

---------------------------------------

विदेश-मंत्री डॉ. एस्-जयशंकरः आतंकवाद-आर्थिकास्थिरता-जलवायुपरिवर्तनादिभिः उत्पन्नाः समस्याः विरुध्य देशानां मध्ये सहयोगवर्धनं सबलं प्रत्यपादयत् ।सः प्रोक्तवान् यत् एताः समस्याः परस्परसम्पृक्ताः सन्ति याः देशसीम्निषु न निबद्धाः । मंत्रिवर्यः अद्य नवदिल्ल्यां यूनाइटेड्-नेशंस्-ट्रूप-कंट्रीब्यूटिंग-कंट्रीज़ (UNTCC) इत्यस्य प्रमुखाणां सम्मेलनं सम्बोधयति स्म । सः अकथयत् यत् भारतं शान्तिस्थापनां सभ्यतागतं सिद्धान्तम् इव पश्यति ।

---------------------------------------

विदेशमन्त्रालयः-भारत-तैल-आयातः

भारतं अद्य अवदत् यत् साम्प्रतिकेन अमेरिका-सर्वकारेण तेन सह ऊर्जा-सहकारसम्बन्धान् प्रगाढीकर्तुं रुचिः दर्शिता अस्ति, संवादश्च प्रचलतीति। देशस्य ऊर्जा-स्रोतस्य विषये प्रसारमाध्यमानां प्रश्नानां प्रतिक्रियारूपेण, विदेशमन्त्रालयस्य प्रवक्ता रणधीर- जैसवाल: अवदत् यत्, भारतदेशः बहुभ्यः वर्षेभ्यः ऊर्जा-क्रयणं वर्धयितुं प्रयतमानः अस्ति, यत्र गतदशके निरन्तरतया प्रगतिः च अभवत्। प्रवक्ता अकथयत् यत् देशस्य तैल-आयात-नीतिः अस्थिर-ऊर्जा-परिदृश्ये भारतीय-उपभोक्तॄणां हितरक्षणोद्देश्येन पूर्णतया मार्गदर्शिता अस्तीति। पूर्वं व्हाइट-हाउस इत्यत्र पत्रकारसम्मेलने अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः अवदत् यत् अमेरिकादेशस्य भारतेन सह अतीव उत्तमः सम्बन्धः अस्ति, सः एकः अद्भुतप्रकारकः देशः अस्तीति। सः प्रधानमन्त्रिणं नरेन्द्रमोदिनं महान् व्यक्तिः इति वर्णयित्वा मलेशिया-देशे आसियान्-शिखरसम्मेलने तम् मिलितुं उत्सुकः अस्तीति उक्तवान्।

---------------------------------------

गोयलः/ ब्राज़िलदेशः

वाणिज्योद्योग-मन्त्री पीयूषगोयलः अवदत् यत् देशस्य अर्थव्यवस्था विगतचतुर्वर्षेभ्यः विश्वस्य द्रुतगत्या वर्धमाना अर्थव्यवस्था अस्ति, आगामि विंशति वर्षाणि यावत् इमामेव गतिञ्च धारयितुमपि लक्ष्यम् अस्तीति। सः अवदत् यत् गतदशके पञ्चविंशतिः कोट्यधिकाः जनाः दारिद्र्यात् मुक्ताः अभवन्, नवमध्यमवर्गश्च देशस्य अर्थव्यवस्थां शक्तिं प्रददाति। श्रीगोयलः नवदेहली-नगरे भारत-ब्राजील् व्यापारसंवादम् अभिसंबोधयन् आसीत्।

---------------------------------------

<u>कर्णाटकराज्यम्-निर्मला सीतारामनः</u>

वित्तमन्त्री निर्मला सीतारामन् इत्येषा कृषकेभ्यः सर्वकारस्य साहाय्येन उत्तमार्जनस्य आश्वासनं दत्तवती। सा अद्य कर्णाटकस्य रायचूर्-जनपदस्य जवाल्गेरा-ग्रामे कृषक-प्रशिक्षण-सामान्य-सुविधा-केन्द्रस्य उद्घाटनानन्तरं सम्बोधयन्ती आसीत्।

---------------------------------------

<u>विकसित-भारतम्-प्रश्नोत्तरी</u>

खेल-मंत्रालयेन विकसित-भारत-यंग-लीडर्स-डायलॉग-क्विज़ विंशति-षड्विंशतिः इत्यस्याः प्रश्नोत्तर्याः अन्तिमा तिथिः अस्य मासस्य एकत्रिंशद्दिनाङ्कं यावत् वर्धिता अस्ति । मंत्रालयः अकथय़त् यत् विंशति-लक्षसंङ्ख्याकाः प्रतिभागिनः पूर्वमेव **<u>माई-भारत-पोर्टल</u>** इत्यत्र प्रश्नोत्तर्यां भागं भजितवन्तः सन्ति । मन्त्रालयेन इदमपि प्रोक्तं यत् प्रश्नोत्तरीं प्रति एतादृशं समर्थनम् अवलोक्य अस्याः प्रश्नोत्तर्याः समयः वर्धितः अस्ति ।

---------------------------------------

**<u>बैडमिण्टनक्रीडा</u>**

बैडमिण्टनेति क्रीडायां लक्ष्यसेनः पुरुष-एकल-क्रीडायां, सात्विक्साईराज् रङ्किरेड्डी, चिराग् शेट्टी च पुरुष-डबल्स इति क्रीडायां अद्य डेन्मार्क्-ओपन्-क्रीडायाः प्रागुपान्त्यर्धचक्रे क्रीडन्ति।

।। इति वार्ताः ।।